# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-3) | **प्रश्नपत्रम्**-८ (Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड**- **CE- 2-3-6** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १२/१२/२०१८ | **सन्दर्भग्रन्थः**- महाभारते वनपर्वान्तर्गत नलोपाख्यानम् - ५२-७९ | |

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** १०

१. यदि वेदाः प्रमाणास्ते दिवसादूर्ध्वमुच्यत ।
त्रयोदशः समः कालो ज्ञायतां परिनिष्ठितः ॥

२. आसीद् राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रुपवान् इव कोविदः ॥

३. यं यं हि ददृशे तेषां तं तं मेने नलं नृपम् ।
सा विचिन्तयन्ती बुद्ध्याथ तर्कयामास भाविनी ॥

**प्र-२ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** १०

१. हंसेन दत्तं दमयन्तीनलयोः परस्परसन्देशः ।

२. नलस्य यज्ञानुष्ठानम् संतानोत्पादनम् च ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कयोरपि द्वयोः श्लोकयोः ससन्दर्भ प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** १०

१. मयि निः संशयं दुःखमियं प्राप्स्यत्यनुव्रता ।
उत्सर्गे संशयः स्यात् तु विन्देतापि सुखं क्वचित् ॥

२. ब्रह्मण्यः साधुवृत्तश्च सत्यवागनसूयकः ।
शीलवान् कार्यसम्पन्नः पृथुश्रीर्धर्मविच्छुचिः ॥

३. यथा विशोका गच्छेयमशोकनग तत् कुरु ।
सत्यनामा भवाशोक अशोकः शोकनाशनः ॥

**प्र-४ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** १०

१. दमयन्त्याः विलापं वर्णयत ।

२. राज्ञः नलस्य चिन्ता एवं दमयन्त्याः त्यागं कृत्वा अन्यत्र गमनम् ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं प्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।** **१०**

१. सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।
नैकेत्र परितिष्ठास्ति ज्ञानस्य पुरुष क्वचित् ॥

२. दमयन्ती तु तच्छ्रुत्वा पुण्यश्लोकस्य चेष्टितम् ।
अमन्यत नलं प्राप्तं कर्मचेष्टाभिसूचितम् ॥

३. न त्वया तत् कृतं धर्म येनाहुं विजितः पुरा ।
फलिता तत् कृते कर्म त्वं च मूढ न बुध्यस्ते ॥

**प्र-६ कस्याप्येकस्य सविस्तरमुत्तरं लिखत ।** **१०**

१. दमयन्तीबाहुकयोः संवादः ।

२. दमयन्तीनलयोः मेलनम् ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. महाभारतं केन लिखितम्?

२. महाभारते कति श्लोकाः सन्ति?

३. महाभारतं केन कथितम्?

४. वनपर्वणि कति पर्वाणि सन्ति?

५. अस्मिन् पर्वणि कयोः संवादः चलति?

६. स्वर्गे कयोः चर्चा भवति?

७. लोकपालनाम् प्रस्थानम् कुत्र भवति?

८. महाभारते प्रधानः रसः कः ?

९. नलं प्रति कः क्रोधं करोति?

१०.दमयन्ती कान् प्रेषयन्ति?

११.कां कीडां नलः न जानाति स्म?

१२.सुदेवब्राह्मणः किं नीत्वा गच्छति?

१३.अश्वाध्यक्षे कः विरजमान अभवत्?

१४.ऋतुपर्ण अश्वविद्यां ज्ञात्वा कुत्र गच्छति?

१५.दमयन्ती कस्य विनाशं करोति?

--००--